## RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**M.A./M.Sc. SECOND SEMESTER EXAMINATION, MAY 2016**

**FIRST YEAR [BATCH 2015-17]**

Date : 31/5/2016

**SANSKRIT**

Time : 11 am – 3 pm

Paper : V

Full Marks : 100

**[Use a separate Answer Book for each group]**

## Group – A

1. यथेच्छ**मेकस्यो**त्तरं प्रदेयम्। [1×15]

 क) किं सामान्यम्? किञ्च तल्लक्षणम्? समान्यस्वीकारे किं मानम्? समान्यं कतिविधम्? के च सामान्यस्य बाधका इत्येतत्सर्वं पठितग्रन्थदिशालोचयत।

 ख) 'लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तित:' — अत्र तात्पर्यानुपपत्तित इति पदाभावे का हानि:? शक्यसम्बन्धो नाम क इति जिज्ञासां समाधाय सोदाहरणं लक्षणास्वरूपं व्याख्यातव्यम्। [2+2+11]

2. यथेच्छ**मेक**स्मिन् विषये टीका टीकनीया। [1×5]

 क) समवायिकारणम्

 ख) योग्यता

3. यथाभिमतं **दशानां** प्रश्नानामुत्तरं प्रदेयम्। [10×1]

 क) 'गोपबधूटीदुकूलचौराय' इत्यस्य कोऽर्थ:?

 ख) पारिमाण्डल्यं नाम किम्?

 ग) 'अन्त्यो नित्यद्रव्यवृत्तिर्विशेष:' इत्यत्र 'अन्त्य' शब्दस्य कोऽर्थ:?

 घ) अभावस्य क आद्यविभाग:?

 ङ) असमवायिकारणत्वं कस्य भवति?

 च) पञ्चसंख्यकानि कर्माणि कानि?

 छ) कानि खलु नित्यद्रव्याणि?

 ज) समवाय: कतिपयेषु स्थलेषु विद्यते?

 झ) भाषापरिच्छेदग्रन्थस्य एका सुप्रसिद्धा टीका का?

 ञ) क: खलु परामर्श:?

 ट) का नाम पक्षता?

 ठ) असिद्ध: कतिविध:?

 ड) बाधहेत्वाभासस्य उदाहरणमेकं दीयताम्?

 ढ) व्याप्ते: द्वितीयलक्षणं किम्? कारिकादिशा लेख्यम्।

 ण) ज्ञेयत्वादिकं कस्य साधर्म्यम्?

 त) संयुक्तसमवायसन्निकर्षस्य एकमुदाहरणं दीयताम्?

 थ) ज्ञानस्य अधिकरणं किम्?

 द) स्मृते: किं लक्षणम्?

 ध) द्वारं तत्र पदार्थधी: इत्यत्र द्वारमित्यस्य स्वरूपं लेख्यम्।

 न) शाब्दबोधे शक्तिज्ञानस्य क उपयोग:?

4. यथेच्छ**मेकस्य** उत्तरं प्रदेयम्। [1×10]

 क) 'योगश्चित्तवृत्तिनिरोध:' इति सूत्रं व्यासभाष्यानुसारं व्याख्येयम्।

 ख) साङ्ख्यै: सह समानतन्त्रत्वेऽपि योग: कुत्र वैशिष्ट्यं धत्ते? तादृशं तत्त्वं पुन: लक्षणनिर्धारणपूर्वकतया गद्यम्।

5. यथेच्छ**मेकस्य** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

क) धर्मलक्षणमर्थसंग्रहदिशा व्याख्याय जैमिनिकृतधर्मलक्षणसूत्रं चोद्धृत्य भास्करोक्तधर्मलक्षणस्य सूत्रोक्तलक्षणेन सह विरोधोऽस्ति न वेति विचार्यम्। [6+1+3]

ख) का नाम भावना? का नाम शाब्दी भावना? किं तस्याः अंशत्रयम्? अंशत्रयोपेतशाब्दभावनास्वरूपं सोदाहरणं व्याख्यातव्यम्। [1+1+1+7]

## Group – B

6. a) अधःस्थितेषु अलङ्कारेषु यथेच्छं **त्रयाणाम्** लक्षणस्य सोदाहरणं व्याख्यानं कार्यम्। [3×5]

क) रूपकम्

ख) उत्प्रेक्षा

ग) यमकम्

घ) वक्रोक्तिः

ङ) विशेषोक्तिः

b) कस्यचन **एकस्य** स्वरूपमालोच्यताम्। [1×5]

क) उपमानन्वययोर्भेदः कीदृशः?

ख) छेकानुप्रासवृत्त्यनुप्रासयोर्भेदः कीदृशः?

7. यथामति **एकः** प्रश्नः समाधेयः। [1×10]

क) ध्वन्यालोकग्रन्थस्य आद्यं पद्यं तथा व्याख्यायतां, यथा तत्र ध्वनित्रयसद्भावः प्रतीयेत।

ख) को नाम अभाववादः? तस्य कति भेदाः ध्वनिकृता कल्पिताः? तेषां कोऽपि एको व्याख्यायताम्।

8. अधःस्थेषु **दशानां** प्रश्नानामुत्तरं प्रदीयताम्। [10×1]

क) ध्वनिप्रस्थानस्य कस्तावत् उपलभ्यमानो ग्रन्थः?

ख) ध्वनिप्रस्थानस्य प्रथमग्रन्थे कति उद्योताः सन्ति?

ग) कस्तावदानन्दवर्धनः?

घ) स्वेच्छाकेसरी इति कस्य नामान्तरम्?

ङ) काव्यस्यात्मा इति कारिकास्थस्य समाम्नात इति पदस्य कोऽर्थः?

च) प्रस्थानपदस्य लोचनकारोक्तं व्याख्यानम् उद्ध्रियताम्।

छ) ध्वनिविरोधितया कति पक्षा उपन्यस्ताः? तेषां नामानि लिखत।

ज) भाक्तम् इति पदेन किमवगम्यते?

झ) तस्मात् प्रवादमात्रं ध्वनिरिति वचनं केन कथितम्? वचनस्यास्य कः आशयः?

ञ) 'यस्मिन् नास्ति किञ्चन' इत्यत्र कर्तृरूपेण कस्य नाम अभिनवगुप्तेन कथितम्?

ट) सहृदयशब्दस्य एकः पर्यायशब्दः लिख्यताम्।

ठ) वाच्यार्थः इत्यनेन कस्यार्थस्य प्रतीतिः?

ड) आनन्दवर्धनमतेन काव्यशरीरं कथं चारुत्वमवगाहते?

ढ) प्रतीयमानार्थस्यावस्थितिः कुत्र?

ण) रसध्वनिः कथं प्रकाशते?

त) रसध्वनेः स्वशब्दनिवेदितत्वमस्ति न वेति उच्यताम्।

थ) कस्तावच्छोकः?

द) प्रतिभा इति पदेन किमवगम्यते?

ध) आनन्दवर्धनमतेन कति महाकवयो गणिताः? यथेच्छमेकस्य नाम लिख्यताम्।

न) उपसर्जनीकृतस्वार्थौ इति कयोरुल्लेखः?

9. अधःस्थितस्य प्रश्नस्य उत्तरं विधेयम्। [1×10]

भारतीयभाषाचर्चायां संस्कृतस्यावदानमालोचनीयम्।

—————— × ——————